# Shri Raghavendra Kavacham

# શ્રીરાઘવેન્દ્રકવચમ્

## Document Information

Text title : Shri Raghavendra Kavacham

File name : rAghavendrakavacham.itx

Category : deities_misc, gurudev, kavacha

Location : doc_deities_misc

Author : appaNAchArya

Proofread by : PSA Easwaran

Latest update : April 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રકવચમ્

(શ્રીઅપ્પણાચાર્ય કૃત)

કવચં રાઘવેન્દ્રસ્ય યતીન્દ્રસ્ય મહાત્મનઃ ।
વક્ષ્યામિ ગુરુવર્યસ્ય વાઞ્છિતાર્થપ્રદાયકમ્ ॥ ૧॥

ઋષિરસ્યાપ્પણાચાર્યઃ છન્દોઽનુષ્ટુપ્ પ્રકીર્તિતમ્ ।
દેવતા શ્રીરાઘવેન્દ્રગુરુરિષ્ટાર્થસિદ્ધયે ॥ ૨॥

અષ્ટોત્તરશતં જપ્યં ભક્તિયુક્તેન ચેતસા ।
ઉદ્યત્પ્રદ્યોતનદ્યોતભર્મકૂર્માસને સ્થિતમ્ ॥ ૩॥

એધખદ્યોતનદ્યોતપ્રતાપં રામમાનસમ્ ।
ધૃતકાષાયવસનં તુલસીહારવક્ષસમ્ ॥ ૪॥

દોર્દણ્ડવિલસદ્દણ્ડકમણ્ડલુવિરાજિતમ્ ।
અભયજ્ઞાનમુદ્રાક્ષમાલાશીલકરામ્બુજમ્ ॥ ૫॥

યોગીન્દ્રવન્દ્યપાદાબ્જં રાઘવેન્દ્રગુરું ભજે ।
શિરો રક્ષતુ મે નિત્યં રાઘવેન્દ્રોઽખિલેષ્ટદઃ ॥ ૬॥

પાપાદ્રિપાટને વજ્રઃ કેશાન્ રક્ષતુ મે સદા ।
ક્ષમાસુરગણાધીશો મુખં રક્ષતુ મે ગુરુઃ ॥ ૭॥

હરિસેવાલબ્ધસર્વસમ્પત્ભાલં મમાવતુ ।
દેવસ્વભાવોઽવતુ મે દૃશૌ તત્ત્વપ્રદર્શકઃ ॥ ૮॥

ઇષ્ટપ્રદાને કલ્પદ્રુઃ શ્રોત્રે શ્રુત્યર્થબોધકઃ ।
ભવ્યસ્વરૂપો મે નાસાં જિહ્વાં મેઽવતુ ભવ્યકૃત્ ॥ ૯॥

આસ્યં રક્ષતુ મે દુઃખતૂલસઙ્ઘાગ્નિચર્યકઃ ।
સુખધૈર્યાદિસુગુણો ભ્રુવૌ મમ સદાઽવતુ ॥ ૧૦॥

ઓષ્ઠૌ રક્ષતુ મે સર્વગ્રહનિગ્રહશક્તિમાન્ ।

ઉપપ્લવોદધેસ્સેતુર્દન્તાન્ રક્ષતુ મે સદા ॥ ૧૧॥

નિરસ્તદોષો મે પાતુ કપોલૌ સર્વપાલકઃ ।
નિરવદ્યમહાવેષઃ કણ્ઠં મેઽવતુ સર્વદા ॥ ૧૨॥

કર્ણમૂલે તુ પ્રત્યર્થિમૂકત્વાકરવાઙ્ મમ ।
બહુવાદિજયી પાતુ હસ્તૌ સત્તત્ત્વવાદકૃત્ ॥ ૧૩॥

કરૌ રક્ષતુ મે વિદ્વત્પરિજ્ઞેયવિશેષવાન્ ।
વાગ્વૈખરીભવ્યશેષજયી વક્ષસ્થલં મમ ॥ ૧૪॥

સતીસન્તાનસમ્પત્તિભક્તિજ્ઞાનાદિવૃદ્ધિકૃત્ ।
સ્તનૌ રક્ષતુ મે નિત્યં શરીરાવદ્યહાનિકૃત્ ॥ ૧૫॥

પુણ્યવર્ધનપાદાબ્જાભિષેકજલસઞ્ચયઃ ।
નાભિં રક્ષતુ મે પાર્શ્વૌ દ્યુનદીતુલ્યસદ્ગુણઃ ॥ ૧૬॥

પૃષ્ઠં રક્ષતુ મે નિત્યં તાપત્રયવિનાશકૃત્ ।
કટિં મે રક્ષતુ સદા વન્ધ્યાસત્પુત્રદાયકઃ ॥ ૧૭॥

જઘનં મેઽવતુ સદા વ્યઙ્ગસ્વઙ્ગસમૃદ્ધિકૃત્ ।
ગુહ્યં રક્ષતુ મે પાપગ્રહારિષ્ટવિનાશકૃત્ ॥ ૧૮॥

ભક્તાઘવિધ્વંસકરનિજમૂર્તિપ્રદર્શકઃ ।
મૂર્તિમાન્પાતુ મે રોમં રાઘવેન્દ્રો જગદ્ગુરુઃ ॥ ૧૯॥

સર્વતન્ત્રસ્વતન્ત્રોઽસૌ જાનુની મે સદાઽવતુ ।
જઙ્ઘે રક્ષતુ મે નિત્યં શ્રીમધ્વમતવર્ધનઃ ॥ ૨૦॥

વિજયીન્દ્રકરાબ્જોત્થસુધીન્દ્રવરપુત્રકઃ ।
ગુલ્ફૌ શ્રીરાઘવેન્દ્રો મે યતિરાટ્ સર્વદાઽવતુ ॥। ૨૧॥

પાદૌ રક્ષતુ મે સર્વભયહારી કૃપાનિધિઃ ।
જ્ઞાનભક્તિસુપુત્રાયુર્યશઃ શ્રીપુણ્યવર્ધનઃ ॥ ૨૨॥

કરપાદાઙ્ગુલીઃ સર્વા મમાવતુ જગદ્ગુરુઃ ।
પ્રતિવાદિજયસ્વાન્તભેદચિહ્નાદરો ગુરુઃ ॥ ૨૩॥

નખાનવતુ મે સર્વાન્ સર્વશાસ્ત્રવિશારદઃ ।
અપરોક્ષીકૃતશ્રીશઃ પ્રાચ્યાં દિશિ સદાઽવતુ ॥ ૨૪॥

સ દક્ષિણે ચાવતુ માં સમુપેક્ષિતભાવજઃ ।
અપેક્ષિતપ્રદાતા ચ પ્રતીચ્યામવતુ પ્રભુઃ ॥ ૨૫॥

દયાદાક્ષિણ્યવૈરાગ્યવાક્પાટવમુખાઙ્કિતઃ ।
સદોદીચ્યામવતુ માં શાપાનુગ્રહશક્તિમાન્ ॥ ૨૬॥

નિખિલેન્દ્રિયદોષઘ્નો મહાનુગ્રહકૃદ્ગુરુઃ ।
અધશ્ચોર્ધ્વં ચાવતુ મામષ્ટાક્ષરમનૂદિતમ્ ॥ ૨૭॥

આત્માઽઽત્મીયાઘરાશિઘ્નો માં રક્ષતુ વિદિક્ષુ ચ ।
ચતુર્ણાં ચ પુમર્થાનાં દાતા પ્રાતઃ સદાઽવતુ ॥ ૨૮॥

સઙ્ગ્રામેઽવતુ માં નિત્યં તત્ત્વવિત્સર્વસૌખ્યકૃત્ ।
મધ્યાહ્નેઽગમ્યમહિમા માં રક્ષતુ મહાયશાઃ ॥ ૨૯॥

મૃતપોતપ્રાણદાતા સાયાહ્ને માં સદાઽવતુ ।
વેદિસ્થપુરુષોજ્જીવી નિશીથે પાતુ માં ગુરુઃ ॥ ૩૦॥

વહ્નિસ્થમાલિકોદ્ધર્તા વહ્નિતાપાત્સદાઽવતુ ।
સમગ્રટીકાવ્યાખ્યાતા ગુરુર્મે વિષયેઽવતુ ॥ ૩૧॥

કાન્તારેઽવતુ માં નિત્યં ભાટ્ટ (ભાષ્ય) સઙ્ગ્રહકૃદ્ગુરુઃ ।
સુધાપરિમળોદ્ધર્તા સુ (સ્વ)ચ્છન્દસ્તુ સદાઽવતુ ॥ ૩૨॥

રાજચોરવિષવ્યાધિયાદોવન્યમૃગાદિભિઃ ।
અપસ્મારાપહર્તા નઃ શાસ્ત્રવિત્સર્વદાઽવતુ ॥ ૩૩॥

ગતૌ સર્વત્ર માં પાતૂપનિષદર્થકૃદ્ગુરુઃ ।
ઋગ્વ્યાખ્યાનકૃદાચાર્યઃ સ્થિતૌ રક્ષતુ માં સદા ॥ ૩૪॥

મન્ત્રાલયનિવાસી માં જાગ્રત્કાલે સદાઽવતુ ।
ન્યાયમુક્તાવલીકર્તા સ્વપ્ને રક્ષતુ માં સદા ॥ ૩૫॥

માં પાતુ ચન્દ્રિકાવ્યાખ્યાકર્તા સુપ્તૌ હિ તત્ત્વકૃત્ ।
સુતન્ત્રદીપિકાકર્તા મુક્તૌ રક્ષતુ માં ગુરુઃ ॥ ૩૬॥

ગીતાર્થસઙ્ગ્રહકરસ્સદા રક્ષતુ માં ગુરુઃ ।
શ્રીમધ્વમતદુગ્ધાબ્ધિચન્દ્રોઽવતુ સદાઽનઘઃ ॥ ૩૭॥

ઇતિ શ્રીરાઘવેન્દ્રસ્ય કવચં પાપનાશનમ્ ।
સર્વવ્યાધિહરં સદ્યઃ પાવનં પુણ્યવર્ધનમ્ ॥ ૩૮॥

ય ઇદં પઠતે નિત્યં નિયમેન સમાહિતઃ ।
અદૃષ્ટિઃ પૂર્ણદૃષ્ટિઃ સ્યાદેડમૂકોઽપિ વાક્પતિઃ ॥ ૩૯॥

પૂર્ણાયુઃ પૂર્ણસમ્પત્તિભક્તિજ્ઞાનાભિવૃદ્ધિકૃત્ ।
પીત્વા વારિ નરો યેન કવચેનાભિમન્ત્રિતમ્ ॥ ૪૦॥

જહાતિ કુક્ષિગાન્ રોગાન્ ગુરુવર્યપ્રસાદતઃ ।
પ્રદક્ષિણનમસ્કારાન્ ગુરોર્વૃન્દાવનસ્ય યઃ ॥ ૪૧॥

કરોતિ પરયા ભક્ત્યા તદેતત્કવચં પઠન્ ।
પઙ્ગુઃ કૂણિશ્ચ પૌગણ્ડઃ પૂર્ણાઙ્ગો જાયતે ધ્રુવમ્ ॥ ૪૨॥

શેષાશ્ચ કુષ્ઠપૂર્વાશ્ચ નશ્યન્ત્યામયરાશયઃ ।
અષ્ટાક્ષરેણ મન્ત્રેણ સ્તોત્રેણ કવચેન ચ ॥ ૪૩॥

વૃન્દાવને સન્નિહિતમભિષિચ્ય યથાવિધિ ।
યન્ત્રે મન્ત્રાક્ષરાણ્યષ્ટૌ વિલિખ્યાત્ર પ્રતિષ્ઠિતમ્ ॥ ૪૪॥

ષોડશૈરુપચારૈશ્ચ સમ્પૂજ્ય ત્રિજગદ્ગુરુમ્ ।
અષ્ટોત્તરશતાખ્યાભિરર્ચયેત્કુસુમાદિભિઃ ॥ ૪૫॥

ફલૈશ્ચ વિવિધૈરેવ ગુરોરર્ચાં પ્રકુર્વતઃ ।
નામશ્રવણમાત્રેણ ગુરુવર્યપ્રસાદતઃ ॥ ૪૬॥

ભૂતપ્રેતપિશાચાદ્યાઃ વિદ્રવન્તિ દિશો દશ ।
પઠેદેતત્ત્રિકં નિત્યં ગુરોર્વૃન્દાવનાન્તિકે ॥ ૪૭॥

દીપં સંયોજ્ય વિદ્યાવાન્ સભાસુ વિજયી ભવેત્ ।
રાજચોરમહાવ્યાઘ્રસર્પનક્રાદિપીડનાત્ ॥ ૪૮॥

કવચસ્ય પ્રભાવેણ ભયં તસ્ય ન જાયતે ।
સોમસૂર્યોપરાગાદિકાલે વૃન્દાવનાન્તિકે ॥ ૪૯॥

કવચાદિત્રિકં પુણ્યમપ્પણાચાર્યદર્શિતમ્ ।
જપેદ્યઃ સ ધનં પુત્રાન્ ભાર્યાં ચ સુમનોરમામ્ ॥ ૫૦॥

જ્ઞાનં ભક્તિં ચ વૈરાગ્યં ભુક્તિં મુક્તિં ચ શાશ્વતીમ્ ।
સંપ્રાપ્ય મોદતે નિત્યં ગુરુવર્યપ્રસાદતઃ ॥ ૫૧॥

ઇતિ શ્રીમદપ્પણાચાર્યવિરચિતં શ્રીરાઘવેન્દ્રકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Raghavendra Kavacham*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*